निपातविवेचनम् - ५०१०

वर्षम् - ८, अङ्कः - १०२ मार्गशीर्ष-पौषमासः-2073 / दिसम्बर मासः-2016

# आर्ष-ज्योतिः

ज्योतिष्कृणोति सूनरी

श्रीमद् दयानन्द वेदार्ष-महाविद्यालय-न्यास का द्विभाषीय मासिक मुखपत्र

## अन्ताराष्ट्रिय-मूल्याङ्कित-शोधपत्रिका



महर्षि स्वामी दयानन्द सरस्वती

**प्रसारणकार्यालयः**

श्रीमद् दयानन्दार्ष-ज्योतिर्मठ-गुरुकुलम् पौन्धा,
देहरादूनम् (उत्तराखण्डः)
दूरवाणी - ७५७९४६६६५९ चलवाणी - ०९४११०६१०४
ई-मेल : arsh.jyoti@yahoo.in Website: www.pranwanand.org

# निपातविवेचनम्

❑ डॉ. आचार्यबृहस्पतिमिश्रः...

आसंसारे विद्यामानासु भाषासु भाषाणां द्वैविध्यं शब्दप्रसविनित्वं शब्दाहरिणित्वं च । शब्दप्रसविनीषु भाषासु तत्र वर्त्तन्ते संस्कृतम्, ग्रीकः, लैटिनः इत्यादयः काश्चन एव । शब्दाहरिणीषु सर्वाः आधुनिक्यो भाषाः हिन्दी, ओड़िया, बंगाली, अंग्रेजी, फ्रेन्चः, उर्दूः इत्यादयः परिगण्यन्ते ।

शब्दप्रसविनीष्वपि नवनवीनानां शब्दानाम् उत्पादने प्राचीनतमायां सत्यामपि संस्कृतभाषायाः एव उत्कृष्टं स्थानम् अधुनापि अस्ति इति भाषावैज्ञानिकाः दृढतया प्रतिपादयन्ति ।[1]

अनया नवनवीनानां शब्दानाम् उत्पादनेन अन्यासां भाषाणां पोषणं कृत्वा ताभ्यः सजीवतादानस्य सामर्थ्यं ज्ञात्वैव कदाचित् संस्कृतभाषायाः देवपदवाच्याः पर्यायाः प्रसिद्धा जाता स्युः यथा आह महाकविः दण्डी काव्यादर्शे –

**एषा वै देवी वाक् अन्वाख्याता महर्षिभिः ।[2]**

अस्यां देवभाषायां पदसमूहपरिभाषाभाषित– वाक्यरचनायाञ्च पदानि चतुर्विधानि **नाम-आख्यात-उपसर्ग-निपाताख्यानि।**[3] सत्वप्रधानानि नामानि – तन्नाम येनाभिदधाति सत्त्वम्[4], भावप्रधानमाख्यातञ्च – तद् आख्यातं येन भावः स धातुः[5], स्वतोऽर्थः सृज्यते अपूर्वः स हि उपसर्गः । भाषायाश्च साकल्येनावगनाय नामाख्यातोपसर्ग– विवेचनानन्तरं तदत्र निपातानां विवेचनक्रमे अर्थदृष्ट्या वैभिन्न्यं दृश्यते । महर्षिपाणिनिस्तु **चादयोऽसत्त्वे** इति सूत्रे **असत्त्ववान् शब्दः निपातः**[6] इत्याह , महाभाष्यकारः पतञ्जलिरपि एतदेव अन्ववादि[7]। निरुक्तकारः आचार्यः यास्कस्तु **निपातः उच्चावाचेषु अर्थेषु निपतन्ति इति । अपि उपमार्थे। अपि कर्मोपसंग्रहार्थे । अपि पादपूरणः ।**[8]

निरुक्ते उक्तं यास्कस्य अर्थमेव अन्येपि आचार्याः मन्वते । यथा–

**प्रातिपदिकार्थयोगात् धातुछन्दोनिरुक्त्युक्त्या च ।**
**यस्मान् निपतन्ति पदे तस्मात् प्रोक्ताः निपातास्तु ।।**[9]
**निपात्यन्ते यथाकथाञ्चित् साधुक्रियन्ते इति**
**निपाताः। निश्चितः पातः एषामिति निपाताः ।**[10]

निपातानां संख्यादृष्ट्या अपि इयत्ता नास्ति। बहुभिः शास्त्रकारैः इत्थमेव निर्दिश्यते –

**इयन्तः इति संख्यानं निपातानां न विद्यते ।**
**प्रयोजनवशात् ह्येते निपात्यन्ते पदे पदे ।।**[11]
**अनन्ताः खलु अन्तार्थाः स्वराद्याश्चादयोपि च ।**
**असत्त्वपरतयैवात्र चादीनां नियता मता ।।**[12]
**निपातनामर्थवशान्निपातनादनर्थकानामितरे च**
**सार्थकाः। नेयन्त इत्यस्ति संख्येह वाङ्मये मिताक्षरे**
**चाप्यमिताक्षरे च ।।**[13]
**को नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानां**
**संख्यामादेष्टुम् ।।**[14]
**निपातगणतो ग्राह्या निपाता अपरोऽपि च ।।**[15]
**अपरिमिताश्च निपाता इति ।।**[16]
**नैपातिकानां नाम्नां तु प्रागुक्तैर्नामलक्षणैः ।**
**सम्पन्नानां पृथक्त्वेन परिसंख्या न विद्यते ।।**[17]

एतेषां विभाजनम् अपि बहुविधम्। पाणिनीयव्याकरणे एषां गणना अव्ययेषु भवति।[18] पाणिनीयतन्त्रे एव (१) चादयः[19] (२) प्रादयः[20] (३) गतिसंज्ञकाः[21] (४) कर्मप्रवचनीयसंज्ञकाः[22] इति चतुर्विधाः। पाणिनीयतन्त्रे एव निपातानां रूपं दृष्ट्वा – निपाताः 'उपसर्गविभक्तिप्रत्ययस्वरप्रतिरूपकाश्च'[23] इत्युक्तम् । तस्यायम् आशयो यत् केचन निपाताः उपसर्गसदृशाः, केचन विभक्त्यन्तसदृशाः, केचन स्वरसदृशाश्च भवन्ति इति । केषांचन निपातानां